नं. ५०८९

नाम. दीक्षा विधि माला शोधनं
मन्त्र शोधनं

कर्ता. × × ×

पत्र. १५ — वि० ५

विषय. तन्त्रम्.

दीक्षाविधिमालाशोधनमंत्रशोधनादि

मंत्रसारे

५००९

5009

F. = 14

1, 10 MISSING.

सार्धिएण यतीदीक्षापितृदीक्षादीक्षाचवनवासिना वि
विक्षाश्रमेनोदीक्षानमाकल्पानदायका इत्यादिनिषेधव
चनादेभ्यो मंत्रंगृह्णीयादित्यादितु सिद्धेतरविषयं सिद्धमं
त्रंनदुष्यतीतिवचनात् सिद्धयामले सपत्नीदीक्षयेद्भर्त्तान
पितादीक्षयेत्सुतान् नपुत्रंचतथामाताभ्रातरंचनदी
क्षयेत् यदिभाग्यवशान्नैवसिद्धविद्यांलभेत्प्रिये तदैवतां
तुदीक्षितत्यक्त्वागुरुविचारणं प्रमादाच्चतथाज्ञानात्
पितुर्दीक्षांसमाचरेत् प्रायश्चित्तंततःकृत्वापुनर्दीक्षांस
माचरेत् पितुरुपलक्षणं तथामातामहादीनामपि ।
प्रायश्चित्तंतुअयुतजपसावित्रीजपसर्वत्र [illegible]
र तथाचमत्स्यसूक्ते निर्वीर्यंचपितुर्मंत्रंपौत्रेपुत्रके
नदुष्यतीतिवचनं कौलिकमंत्रदीक्षापरं योगिनीतन्त्रे
शाक्तिविद्यामधिकृत्य दीक्षानिषेधात् यत्तुनिजकुल ।

तिलकाय ज्येष्ठपुत्राय दद्यात् इति तत्तारा विद्याविषयं महा
तीर्थेषूपरागे सर्वत्र न दोषः तथा वैशंपायनोसंहितायां विष्णु
पुराणे तथा विष्णुमंत्रमधिकृत्य साधुवृत्तं त्वयात्र स्मन् व
त्साभिसकलेतव ब्रह्मणा कथितं पूर्वं वसिष्ठप्य महात्मने व
सिष्ठोपि स्वपुत्राय मंत्रमिदं दत्तवान्स्वयं प्रसन्नहृदयस्स्वकः पि
तामेककरुणानिधिः कुरुक्षेत्रे महातीर्थे सूर्यपर्वणि दत्तवान्
इत्यादि वैशंपायनीयसंहितायां शौनकं प्रति व्यासवाक्य
योगिनीतंत्रे निर्वीर्यं च पितुर्मंत्रं तथा मातामहस्य च स्वप्नल
ब्धं स्त्रियादत्तं संस्कारेण च शुद्ध्यते यत्तु साध्वी चैव सदाचा
रागुरुभक्ता जितेंद्रिया सर्वमंत्रार्थतत्त्वज्ञा सुशीला पूजने
रता गुरुयोग्या भवेत्सा हि विधवा परिवर्जिता स्त्रियो दी
२ क्षा शुभा प्रोक्ता मातुश्चाष्टगुणाः स्मृताः इदं तु गुरुरपि उ
दी॰ पासितं मंत्रपरं तथा च भैरवीतंत्रे स्वीयमंत्रोपदेशे तु न कु
वि॰ र्याद्गुरुचिंतनं मातरेति उपासिति इह गुणं अनुपासितिषु

भफलमित्यर्थः सिद्धमंत्रविषयं वा इति केचित् वस्तुतस्तु
स्त्रीपदं विधवापरं एकवाक्यत्वात् योगिनीतंत्रे स्वप्नलब्धं
वर्णं कुलं गुरोः प्राणं निवेदयेत् वटपत्रे कुंकुमेन लिखित्वा
ग्रहणं शुभं ततः सिद्धिमवाप्नोति अन्यथा विफलं भवेत्॥
इदं तु सद्गुरोरभावे तत्संवेत स्वादेव गृह्णीयात् इत्यर्थः स्व
प्ने तु नियमो नहीति नारदवचनात् तत्र सिद्धादिनियमो ना
स्ति दीक्षां विना जपस्य दुष्टत्वात् प्रथमं स उच्यते दिव्यं
ज्ञानं यतो दद्यात् कुर्याच्च पापसंक्षयम् तस्माद्दीक्षेति सा प्रो
क्ता मुनिभिस्तत्त्ववेदिभिः सर्वाश्रमेषु दीक्षाया अवश्यकार्यं
तथा च दीक्षामूलं जपं सर्वं दीक्षामूलं परं तपः दीक्षामा
श्रित्य निवसेद्यत्र कुत्राश्रमे नरः अदीक्षिता ये कुर्वन्ति जपपू
जादिकक्रियाः न भवन्ति प्रिये तेषां शिलायामुप्तबीजवत्
देवि दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः तस्मात्सर्वप्रय
त्नेन गुरुणा दीक्षितो भवेत् अदीक्षितोऽपि मरणे रौरवं नर

कंव्रजेत् तस्माद्दीक्षाप्रयत्नेनसदाकुर्यात्प्रतांत्रिकात् क
ल्पदृष्टांतुमंत्रंवैयोगृह्णातिनराधमः मन्वंतरसहस्रेषु नि
ष्कृतिर्नैवजायते नादीक्षितस्यकार्यंस्यात्तपोभिर्नियमव्र
तैः नतीर्थगमनेनापिनचशारीरयंत्रणैः अतः सद्गुरो
र्दृष्टिंतंदीक्षासर्वकर्माणिसाधयेत् अत्रापिअननुकूल
मंत्रंगृह्णीयात् तथाच स्वताराराशिकोष्ठानामननुकूला
न् भजेन्मनून् तथाचवामार्चनतंत्रे ताराचक्रं राशिचक्रं
नामचक्रंतथैवच अत्रचेत्समगुणोमंत्रो नान्यच्चक्रंविचा
रयेत् इतिनुप्राधान्यतयाबोध्यं तथाच धनिमंत्रंनगृ
ह्णीयादकुलंचतथैवच इत्यादिदर्शनात् तत्रचक्रविचा
रस्यावश्यकत्वान्निरूप्यते तत्र नृसिंहार्कवराहाणां प्रासा
दी॰ दप्रणवस्यच सपिंडाक्षरमंत्राणां सिद्धादीन्नैवशोधयेत्
वि॰ स्वप्नलब्धेस्त्रियादत्ते मालामंत्रेचत्र्यक्षरे वैदिकेषुच
६ सर्वेषु सिद्धादीन्नैवशोधयेत् मालामंत्रास्तुवाराहीये ।।

विंशत्यक्षराधिका मंत्रा मालामंत्राः प्रकीर्तिताः नपुंसकस्य मं
त्रस्य सिद्धादीन्नैव शोधयेत् हंसस्याष्टाक्षरस्यापि तथा पंचा
क्षरस्य च एकद्वित्र्यादिबीजस्य सिद्धादीन्नैव शोधयेत् एका
क्षरस्य मंत्रस्य मालामंत्रस्य पार्वती वैदिकस्य च मंत्रस्य सिद्धा
दीन्नैव शोधयेत् इत्यादिवचनादिषु विचारो नास्ति वस्तुतस्तु
इदं प्रशस्तापरं सर्वत्र विचारस्यावश्यकत्वे दूरदृष्टेवशगात्
कदाचित्वैरिमंत्रस्य स्वप्नादौ प्राप्या तत्र दोषस्य दृष्टत्वात् इति
तु संप्रदायिकाः तत्र कुलाकुलस्य भेदं द्विवक्ष्यामि मंत्रिणां।
मिह तथा च निबंधे वाय्वग्निभूजलाकाशाः पंचाशल्लि
पिकाः क्रमात् पंचह्रस्वाः पंचदीर्घा बिंदुंताः संधिसंभवाः
पंचशः कादयः वर्णा लसहांताः समारिताः अआ एकचटत
पयषा मारुताः इई ऐखछठथफरक्षा आग्नेयाः उऊ ओग
जडदब लाः पार्थिवाः ऋॠ औघझढधभवसा वारुणाः
लृ ॡ अं ङ ञ ण न मः शहाः नामसाः साधकस्याक्षरं पूर्वं।
मंत्रस्यापि तदक्षरं यदेकभूतं तदेव तं प्रजानीयात् स्व कुलं द्विनत्
भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतम् मारुतं पार्थिवा

नां च अग्नेयं स्याम्भसो रिपुः चकारादाग्नेयपार्थिवां च नाम्भसंस
वं मित्रं स्यादिहैं नैव प्रलयेत् इति कुलाकुलविचारः अथ
राशिविचारश्चक्रम् सूत्रद्वयं पूर्वपरायतं स्यात् मध्यतो याम्य
कुवेरभेदात् एकैकमीशानं निर्मृतं चरेत् कृताग्नावग्नौ विलिखे
त्तोरणान् वेदाग्निवह्नियुगलं च वर्णान् हि संख्यान् पंचेषु बाण
पूरं पंच चतुष्टयाणि मेषादितश्च विलिखेत् सकलांस्तु वर्णान्
कन्यागताश्च विलिखेत्तु दशादिवर्णान् अआ इई मेष उऊ
वृष ऋॠ ऌॡ मिथुन एऐ कर्कट ओऔ सिंह अंअः शषस
ह लक्षः कन्यकः कवर्गस्तुला चवर्गो वृश्चिक टवर्गो धनुः
तवर्गो मकरः पवर्गः कुंभः यवर्गो मीनः स्वराशीनामनुकूलं
मंत्रं भजेत् तथा च स्वतारा राशि कोष्ठानामनुकूलान् भजेम
नून् इति वचनात् मानुषयोर्नाशो वैरं दानवदेवयोः जन्मसं
पद्विपत्क्षेम प्रत्यरिः साधको वधः मित्रं परममित्रं च जन्मा
दीनि पुनः पुनः जन्म तृतीयपंचमसप्तमानि वर्जनीयानि
दी. नक्षत्राणि तथा च रक्ताष्टलवलभक्षाणि युगयुग्मगतान्य
वि. पि इतराणि नक्षत्राणि स्यादि स्वनक्षत्रादेव नक्षत्रं गणनीयं
८

स्वनक्षत्रात्तानि स्वनामाद्यक्षरसंबंधिनक्षत्रादेव गणनीयमिति
प्राग्दक्षिणेन न नक्षत्रं गणनीयमिति प्राग्दक्षिणेन गणयेत्सा
धकाद्यक्षरात्सुधी इति नक्षत्रचक्रं अथ अकथहचक्रं चतुर
स्रो लिखेद्धीमान् चतुःकोष्ठसमन्विते चतुःकोष्ठे षोडशकोष्ठ
इति यावत् चतुरस्रे लिखितकोष्ठचतुष्टयसमन्विते रापूर्णा नाम
द्भुतान्येयात्पजेद्बुद्धं इति अयं स्वराणां मंत्रराशिपूर्वतं गणनीयं वि
चक्षणे तयदाद्यस्वराणां रत्नानि तदा साधकनामाद्यक्षरसंबंधि
नं राशिमारभ्य गणयेत् साध्याद्यक्षरराशिपर्यंतं गणयेत्साधक
दाराविति रामार्चनचंद्रिकायां एकपंचनवबांधवाः स्मृताद्वौ
च षड्दशमाश्च सेवका वह्निसद्गसूनयस्तु पोषका द्वादशा
ष्टचतुरस्तु घातकेति इति वस्तुविषयम् रामार्चनचंद्रिकाधृत
गात् ख्यातपादौ तु षष्ठं वर्जनीयं षष्ठाष्टमद्वादशानि वर्जनीया
नीति वचनात् अथ लग्नात् धनभ्रातृबंधुपुत्ररिपुकलत्र
काः मरणं धर्मकर्मायव्ययाद्वादशराशयः वैरिवीतु पु
त्रस्थाने बंधुरिति पाठः तथा च तंत्रराजे तेन मंत्राद्यवर्णेन

नाम्नाचाद्यक्षरेणच गणयेद्यदिष्टंवाप्यष्टमेद्वादशंत्वथा रिपु
र्मैत्राद्यवर्णःस्यात्तेनतस्याहितंभवति इतिराशिचक्रम् अथन
क्षत्रचक्रम् अआ अश्विनी देवगणः भरणीमानुषः इउऊ कृत्ति
का राक्षसः एऐ ऋ ॠ ऌ ॡ रोहिणी मानुष ए मृगशिरोदेवः
ऐ आर्द्रा मानुषः ओऔ पुनर्वसुदेवः कपुष्योदेवः खगघङ मघा
राक्षसः च पूर्वाफाल्गुनी मानुष छज उत्तराफाल्गुनी मानुषः
झञ हस्तादेवः टठ चित्राराक्षसः ड स्वातीदेवः ढण विशाखा
राक्षसः तथद अनुराधादेवः ध ज्येष्ठाराक्षसः नपफ मूलारा
क्षसः ब पूर्वाषाढामानुषः भ उत्तराषाढामानुषः म श्रवणा
देवः यर धनिष्ठाराक्षसः लव शतभिषाराक्षसः श पूर्वभाद्र
पदा मानुषः षसह उत्तराभाद्रपदामानुषः क्ष अः ल क्षः रेवती
देवः तथा च पिङ्गलातन्त्रे उत्तरदक्षिणयोरन्तरेखाः ऊर्ध्वाश्च त
स्रो दशरेखाः पश्चिमायाकर्त्तव्या वरवर्णिनि अश्विन्यादिक्र
मेणैव विलिखेत्तारकाः पुनः तेनतन्मवर्णिकान् लिखेत् ॥
दी॰ वि॰ ५
पद्मैकच्छविच्छिन्नपावनिभुजपाशिपुग्युग्मं पद्माः पुञ्जेक द्विति
न्नपञ्चवनिचपाणिमूर्छैकपद्माभिवेदाः वर्णाः क्रमात्स्वरा
न्नयुग्म

नौतुरेवत्यं प्रागगतावुभौ तथा च निबंधे पूर्वोत्तरात्रयंचैव भर
ण्यार्द्राचरोहिणी अमूनिमाघान्याकुर्नक्षत्राणि मणिषिणः
ज्येष्ठाश्लेषाभिषामूलं धनिष्ठा श्रेष्ठ कृत्तिका: चित्रा मघा
विशाखावासुम्नाशारादासम्मताः अश्विनी रेवती पुष्य: स्वाती ह
स्त पुनर्वसु: अनूराधा मृगशिर: श्रवणा देवतारका तथा च
स्वजातौ परमा प्रीती मध्यमा भिन्नजातिषु रक्षो:: पुनश्चत
ष्कं तत्रापि लिखेत्धीमान्क्रमेण तु इति विश्वसारतंत्रवचना
त् तत्र षोडशकोष्ठे अकारादिवर्णान् प्रागादिक्षिपेन्न्येन लिखे
त् तत्रक्रम: इंदुअग्निरुद्र नवनेत्रयुगार्कदिक्सप्त षट्षोडश
चतुर्दश भौतिकेषु पातालपंचदश वह्निहिमांशु कोष्ठे वर्णालि
खेल्लिपिमवान् क्रमशस्तु धीमान् नामाद्यक्षरमारभ्य यावज्ज
न्मादिमाक्षरं चतुर्भि:कोष्ठैरेकैकमिति कोष्ठचतुष्टयं पुन:को
ष्ठगकोष्ठेषु सव्यतो नाम्न आदित: सव्यतो दक्षिणत: तथा च वि
श्वसारे दक्षिणावर्तयोगेन कोष्ठे वर्णान् लिखेत्क्रमात् येनैव लि
खनं कुर्यात्तेनैव गणनं भवेत् सिद्ध: साध्य: सुसिद्धोरि: क्रमा

ज्ञेया विचक्षणैः सिद्धसिद्ध्यति कालेन साध्यःस्तु जपहोमतः
सुसिद्धो ग्रहणादेव रिपुर्मूलनिकृंतति सिद्धार्णा बांधवा प्रो
क्ताः साध्यास्ते सेवकास्मृताः सुसिद्धाः पोषकाज्ञेयाः शत्रवो
घातकामताः जपेन बंधुः सिद्धः स्यात् सेवकोऽधिकसेवया ॥
पोष्णाति पोषकोऽभीष्टं घातको नाशयेद्ध्रुवं सिद्धसिद्धो यथो
क्तेन द्विगुणात्सिद्धसाधकः सिद्धः सु सिद्धोर्द्धजपात्सि
द्धारिं हंति बांधवान् साध्यसिद्धो द्विगुणकः साध्यसाध्यो
निरर्थकः तत्सुसिद्धस्त्रिगुणजपः साध्यारिर्हंति गोत्रजा
जान् सुसिद्धसिद्धोर्द्धजपः साध्यो द्विगुणाधिकात् तत्सुसि
द्धो ग्रहणादेव सुसिद्धारिः स्वगोत्रहा अरिसिद्धः सुतान्हन्यादरि
साध्यस्तु कन्यकाः तत्सुसिद्धस्तु पत्नीघ्नस्तदरिर्हंति साध
कं अथ कडमचक्रं लेखाद्वयं पूर्वपरेण कुर्यात्तन्मध्यतो
दी ६ याम्यकुबेरभेदात् महेशपारद्वौ यिपतिक्रमेण तिर्यक्तेष्वा
वायुहुताशनेन अकारादीन् हकारांतान् लीवर्त्तिनान्

लिखेत्क्रमात् एकैकक्रमतो लेख्यान्मेषादिषु वृषांतकान्
गणाद्येक्रमयोगभद्रेनामादिवर्णकादिकान् मेषादितक्रमी
कांतगणायेक्रमयोः स्वधी जन्तुस्वनामलोमंत्रीयावन्मंत्रा
दिमादौ सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादयः पुनः
नवैकपंचमे सिद्धः साध्यः षड्दशयुग्मके सुसिद्धास्त्रीस
प्तकेरुद्रवेदाष्टद्वादशेरिपुः एतन्नेकथितं देव्याः क्रमा
दिकमुत्तमं इदं तु गोपालविषयकमेव गोपालेऽककडमः
स्मृत इति वचनात् अथारिकचधनचक्रं तद्यथा कोष्ठान्ये
कादशान्येववेदेन पूरितानि च अकारादिहकारांतं लि
खेत्कोष्ठेषु तत्त्ववित् प्रथमं पंचकोष्ठेषु ह्रस्वदीर्घक्रमे
ण तु द्वयं द्वयं लिखेत्तत्र विचारे खेतु साधवः प्रोक्ते षडैकैक
शो वर्णान् क्रमतस्तु लिखेत्सुधीः षट्कालकालवियद
ग्निसमुद्रवेदकामाङ्गभून्य[illegible]नाः खेलु साध्यवर्णाः युग्मद्वि
पंचविषयदेवरसुक्रमा[illegible] व्योमाब्धिवेदशैशिप्राणाव

त्तु साधकार्णाः नामाज्जलादकठचाङ्गजमुक्तकोष्ठजातो
भयोरधिकशेषमृणधनं स्यात् अस्यार्थः साध्यवर्णान्
क्रमेन स्वरविजनरूपेन पृथक्कृतान् युग्मादेरेकैकेगुण
यित्वा अष्टअष्टसंख्याभिर्हृत्वा उभयोः साध्यसाधक
योः अधिकं ऋणशेषं धनं ज्ञात्वा मंत्रं दद्यात् यदा मंत्र
चेदृणी भवति तत्तदा मंत्र शुभदायको भवति धनी चेन्न
तत्रांतरे मंत्रो यद्यधिकांकः स्यात्ततो मंत्रं जपेत्सुधिः
समेपि च जपेन्मंत्रं न जपेदृणाधिके शून्ये मृत्युं विजा
नीयात्तस्माच्छून्यं विवर्जयेत् तथा च रुद्रदत्तेन त्रविपं
वदपार्त्ते वेद वह्न्यायुधाष्टनवेभिर्गुणिताश्च साध्याद्र
दिग्भूगिरि अश्वागागाग्नि नीषुवेद षड्वृद्धिभिस्तु गु
णिता न ध्यसाधकार्णान् षट्कालेत्यादि विलुननंतविस्त
विषयं रामार्चने च चंडिकोद्धृतत्वात् इति केचित् ॥

दी० १४

वस्तुतस्तु पूर्वस्यैव विवर्णमेतत् तथाहि इडर्दीनेत्रेत्याद्यंकंन
मांनकोष्टांकमध्याभिस्तन्यादेकादिरुद्रांकगतक्रमेण रुद्रयाम
लेच साध्याकात्साधकांकश्च पूरयेद्रुद्रसंख्यया गुणितेः
शुद्धतांकानां यच्छेषं जायते स्फुटं तदेककथयामि त्रैप
कादश्लाग्रहस्थितं तथा नामाद्यक्षरमारभ्य यावन्मंत्रा
दिमाक्षरं त्रिधा कृत्वा स्वरैर्भिन्नं तदन्यद्विपरीतकं साधक
नामाद्यक्षरतो गणयेद्यावन्मंत्रादिमाक्षरं त्रिधा कृत्वा स्व
रैर्भिन्नं तदन्यद्विपरीतकं साधकनामाक्षरतो गणयेद्या
वन्मंत्रादिमाक्षरं तावत्संख्यां त्रिधा कृत्वा संख्याभिरु
त्वाधिकं ऋणं शेषं धनं भवेत् तदन्यदिति मंत्राद्यक्षरं मारभ्य
यावत्साधकाक्षरं भवेत् तावत्संख्यां सप्तगुणं कृत्वा त्रिभि
र्हरेत् तथा अत्र च साध्यनाम द्विगुणितं साधकेन स
मन्वितं अष्टभिश्च हरेच्छेषं तदन्यद्विपरीतकम् अस्यार्थः
साध्यनाम स्वरव्यंजनभेदेन द्विगुणीकृत्य साधकाक्षरे
ण समन्वितं कृत्वा अष्टभिर्हरेत् तदन्यदिति साधकनामा

नैस्वरं व्यंजनभेदेन द्विगुणीकृत्य साध्येन हृतं कृत्वा : अष्टभिर्हरेत्
अथ दीक्षाकाल ॥ मन्त्रारम्भस्तु चैत्रे स्यात्समस्तपुरुषार्थदः
वैशाखे रत्नलाभः स्यात् ज्येष्ठे तु मरणं भवेत् आषाढे बन्धुनाशः
स्यात् पूर्णायुः श्रावणे भवेत् प्रजानाशो भवेद्भाद्रे आश्वि
ने रत्नसंचयः कार्तिके मन्त्रसिद्धिः स्यान्मार्गशीर्षे तथा भ
वेत् पौषे तु शत्रुपीडा स्यान्माघे मेधाविवर्धनं फाल्गुने सर्व
कामाः स्युर्मलमासं विवर्जयेत् चैत्रे तु दीक्षाफलम् गोपा
लविषयं गौतमेनोक्तत्वात् मधुमासे भवेद्दीक्षा दुःखायेति
वचनात्तु अन्यत्र अथ वारनियमः रविवारे भवेद्वित्तं सोमे
शान्तिर्भवेत्किलम् आयुरंगारके हन्ति तत्र दीक्षां विवर्ज
येत् बुधे सौन्दर्यमाप्नोति ज्ञानं स्यात्तु बृहस्पतौ शुक्रे सौभा
ग्यमाप्नोति यशोहानिः शनैश्चरे अथ तिथिनियमः ॥
आगमकल्पद्रुमे प्रतिपत्कृता दीक्षा ज्ञाननाशकरी
मता द्वितीयायां भवेज्ज्ञानं तृतीयायां शुचिर्भवेत् चतुर्थ्यां
वित्तनाशः स्यात् पञ्चम्यां बुद्धिवर्धनं षष्ठ्यां ज्ञानक्षयः सो

दी॰
वि॰
८

ख्यं लभते सप्तमे दिने अष्टम्यां बुद्धिनाशः स्यात् नवम्यां वपुषः क्ष
यः दशम्यां राजसौभाग्यमेकादश्यां शुचिर्भवेत् द्वादश्यां सर्व
सिद्धिः स्यात् त्रयोदश्यां दरिद्रता तिर्यग्योनिश्चतुर्दश्यां कृमि
मांसावसानके पर्वाणि धर्मवृद्धिः स्यात् स्वाध्यायं च विवर्जयेत्
सन्ध्यागर्जितनिर्घोषभूकंपोल्कानिपातने प्रतानन्ध्यायश्च दि
वसान् ऋतुष्वन्यान् परिवर्जयेत् द्वादश्यामपि कर्तव्यं त्रयो
दश्यामथापि वेति यत्त्रयोदशीविधानं तद्विष्णुविषयं सामा
न्येन चैद्रिकाध्ययनत्वात् त्रयोदशी च दशमी प्रशस्ता सर्वका
मदेति सनत्कुमारवचनात् अथ नक्षत्रनिर्णयः अश्विन्या
सुखमाप्नोति भरण्यां मरणं ध्रुवं कृत्तिकायां भवेद्दुःखी रोहि
ण्यां वाक्पतिर्भवेत् मृगशीर्षे सुखावाप्तिरार्द्रायां बंधुनाश
नं विशाखायां सुखं चाथ अनुराधा बंधुवर्धनं ज्येष्ठायां
सुतहानिः स्यान्मूलायां कीर्तिवर्धनं पुनर्वसु धनाढ्यः स्यात्
पुष्ये प्राज्ञं विनाशनम् अश्लेषायां भवेन्मृत्युर्मघायां दुःखमो
चनं सौंदर्यं पूर्वफाल्गुण्यां प्राप्नोति धनसम्पदः ज्ञानं चोत्तरफा

ल्गुण्यां हस्तायां च धनी भवेत् चित्रायां ज्ञानसिद्धिः स्यात् स्वात्यां पा
पविनाशनं पूर्वाषाढोत्तराषाढे भवेत्तां कीर्तिदायके श्रवणायां भ
वेद्दुःखी धनिष्ठायां दरिद्रता वृधिप्रान्त भिषायां स्यात् पूर्वभद्रे सु
खी भवेत् सौख्यं उत्तरभाद्रे च रेवत्यां कीर्तिवर्द्धनं ॥ अथ योगनिर्णयः
तत्र विष्कम्भे शुभः सिद्धिश्चायुष्मान् ध्रुवयोगस्ततः परं प्रीतिसौ
९ भाग्ययोगश्च वृद्धियोगस्ततः परं हर्षणश्च तथा योगः सर्वं तत्रैव सु
खावहः बवबालवतैतिलश्च वणिजस्तदनंतरं करणानि शुभा
न्येव सर्वतंत्रेषु भाविनी ॥ अथ लग्ननिर्णयः वृषसिंहे च क
न्यायां धनुर्मीनाख्यलग्नके चंद्रताराऽनुकूले च कुर्याद्दीक्षा
प्रवर्तनं शुक्लपक्षे शुभादीक्षा कृष्णायां पंचमादिनात् निषि
द्धमासे तु तन्त्र द्विप्रोक्ता मुनिभेदतः षष्ठी भाद्रपदे कृष्णे तथा कृ
ष्णा चतुर्दशी कार्तिके नवमी शुक्ला मार्गे शुक्ला तृतीयि
का पौषे च नवमी शुक्ला माघे शुक्ले चतुर्थिका फाल्गुणे न
दी॰ वमी शुक्ला चैत्रे कामचतुर्दशी त्रयोदशीति वा पाठः वैशा
~~७~~ खे चाक्षतया चैव ज्येष्ठे दशहरा तिथि आषाढे पंचमी शुक्ला।
६ श्रावणे कृष्णपंचमी एतानि देवपर्वाणि तीर्थकोटिफलानि

मेत् अन्यच्च मतं चैत्रे त्रयोदशी शुक्ला वैशाखे एकादशी सि
ता ज्येष्ठे च दशमी कृष्णा आषाढे नागपंचमी श्रावणे काद
शी भाद्रे रोहिणीसंयुताष्टमी आश्विनी च महापुण्या मह
ष्टम्याष्टमी सदा कार्त्तिके नवमी शुक्ला मार्गे पूर्णिमा तथा
सिता षष्ठी चतुर्दशी पौषे माघेप्येकादशी सिता फाल्गु
ने च सिता षष्ठी चेति कालनिर्णयः योगिनीतंत्रे अयने
विषुवे चैव ग्रहणे चंद्रसूर्ययोः रविसंक्रांतदिवसे युगाद्या
यां तथैव च मन्वंतरासु सर्वासु जपहोमादिने तथा चतु
र्थीपंचमी चैव चतुर्दश्यष्टमी तिथौ पाक्ति विषये चतुर्थीति
गणेशायं तत्तत्कल्याकृत्वात् निंदने व्यापिकाले शुदीदीक्षा
ग्रहणे शुभा सूर्यग्रहणकालस्य समानो नास्ति भूतले तत्र ले
यद्यत्कृतं कर्म अनंतफलदं भवेत् रविसंक्रमणे चैव सूर्य
स्य ग्रहणे तथा तत्र लग्नादिकं किंचित् न विचार्यं कदाचन शिष्य
स्य जन्मदिवसे शुभदा रविसंक्रमणे चैव नान्यदन्वेषितं भ
वेत् नवारतिथिमासादिशोधनं सूर्यपर्वणि पर्वचंद्रग्रहेपि
तथा न कुर्यात् शान्तिकी दीक्षामुपरक्ते विभावसौ न कुर्या

दैसंवीतांत्रयदिचंद्रमसोग्रहः तथा अमावास्यासोमवा
रेभौमवारेचन्द्रदृष्टी सप्तमेरविवारेच सूर्यपर्वशनैसमाः ॥
शिष्यानात्हृदयग्रहणात्कृपयादीयतेयदा तत्र लग्नादिकं
किंचिन्नविचार्यंकथंचन । तथा सर्ववाराः ग्रहाः सर्वेन
क्षत्राणिचराशयः यस्मिन्नहनिसंतुष्टो गुरुः सर्वेशुभाव
हाः योगिनीतंत्रे ग्रहणेचमहातीर्थेनास्तिकालस्य ॥
नयायांभास्करेजीवेविरजेचंद्रपर्वनि महाविद्यासुकाला
दिविचारो नास्तिशोधनं तदुक्तं मुंडमालातंत्रे काला
दिशोधनं नास्ति नचामित्रादिदूषणं चक्रलेचमतंगेचत
थाकन्याश्रमेषुच तथाहीयाततोदीक्षांतीर्थेष्वेतेषुपार्वती
वाराहीतंत्रे शुक्रोसोमोयेदिवाहृष्टो गुर्वादित्यौभवेद्यदि
मेषवृषभसिंहेषुसत्यदोषोनविद्यते अथमालानिर्ण
यः तर्जनीमध्यमानामानिषिद्धाचातिताः क्रमात् निर्दो
ष्यस्थिपर्वणीणं मध्यमाचैवपर्विका पर्वद्वयंमध्यमाया
मेरुत्वेनोपकल्पयेत् सनत्कुमारसंहितायाम् अनामा

दी॰
११

मध्यमारभ्य कनिष्ठादितएव च तर्ज्जनीमध्यपर्यंतमग्रपर्वसु
संजपेत् एतद्वचनद्वयं त्वष्टोत्तरशतविषयं गोपालविषयं वा
प्राक्तिविषये पुनः अनामिकात्रियं पर्वकनिष्ठा च त्रिपर्विका ।।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्वणि तर्ज्जन्यग्रे तथा मध्य
मोजयेत्स तु पापकृत् इति श्रीक्रमवचनात् हंसपरमेश्वरे प
र्वद्वयमनामायाः परिवर्तनवेक्रमात् पर्वत्रयं मध्यमायास्त
र्ज्जन्येकस्मात् हरेत् शक्तिमालासमाख्याता सर्वतंत्रप्रदीपि
का तत्रैव हृदि हंसे समारोप्य तीर्थीकृत्वा कराङ्गुलीः
वासमाहृत्यौ चाच्छाद्य दक्षिणेन सदा जपेत् अनामामूल
मारभ्य प्रदक्षिणक्रमेन च मध्यमामूलपर्यंतं करमाला
प्रकीर्तिता अंगुलीर्न वियुंजीत किंचिदाकुंचिते न च अंगु
लीनां वियोगाच्च विछुच स्रवते जप अन्यथापि अंगुल्य
ग्रे च यज्जप्तं यज्जप्तं मेरुलंघने पर्वसंधिषु यज्जप्तं तत्सर्वं नि
ष्फलं भवेत् गणनाविधिमुल्लंघ्य यो जपेत् तज्जपं हि यत् गृ
ह्णंति राक्षसास्तेन गणयेत्सर्वदा बुधः सनत्कुमारीये क्रमो

क्रमागतैर्मालामातृकार्णैर्न्नमेरुकैः सबिंदुकैः साष्टवर्गैरंतर्य
जनकर्मणि आदिक्षचडुं तु पुष्पावौष्ठौ प्रकीर्तिता तद्यथा
अकारादीनां वर्णानां कवर्गादीनां चांते मं वर्णमानुस्वारं कृ
त्वा पूर्वमुच्चार्य मंत्रजपः कार्यः अनेन प्रकारेणाष्टोत्तरशत
संख्येजपो भवति अंतर्यजने तूपलक्षणं सवर्णबिंदुमुच्चार्य
पश्चान्मंत्रं जपेद्बुधैः अकारादिलकारांतं बिंदुयुक्तं विभाव्य
च वर्णमालासमाख्याता अनुलोमविलोमका इति नारद
वचनात् अथ मुंडमालायां मालानियमः पद्मबीजादि
भिर्मीला बहिर्योगे प्रशस्ताः रुद्राक्षपद्मपांडाक्षपुत्रजी
वंक मौक्तिके स्फाटिके मणिरत्नेश्च सौवर्णे विद्रुमे तथा
राजतेः जपामूले गृहस्थस्य तु मालिका अंगुलीगण
नादेकं पर्वण्यष्टिगुणं भवेत् पुत्रजीवे दशगुणं पातं शंखैः
सहस्रकं प्रवाले मणिरत्नेश्च दशसाहस्रकं स्मृतं तदेव
स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते तं चैव पद्माक्षैर्दशलक्ष
तस्यात्सौवर्णैः कोटिरुच्यते जपाग्रथ्या कोटिपूतं रु

मा- १९

रुद्राक्षैः स्यादनंतकं सर्वैर्विरचितामालान्नृणां मुक्तिफल
प्रदा कामनाभेदेन तु पद्माक्षैर्विरचितामाला शत्रूणां नाश
नीमता कुशग्रंथिमयीमाला सर्वपापप्रणाशि
नी पुत्रजीवफलैः कृष्णा कुरुते पुत्रसंपदं निर्मिता
रूप्यमालाभिर्जपमालेप्सितप्रदा प्रवालैर्विहितामा
ला प्रयच्छेद्विपुलंधनं ॥ भैरवीविद्यायोत्तवाराहीतं
त्रेव सुवर्णमणिभिर्मालां स्फाटिकं शंखनिर्मितां
प्रवालैरेव वा कुर्यात्पुत्रजीवं विवर्जयेत् पद्माक्षं
चैव रुद्राक्षं भद्राक्षं च विशेषतः ॥ त्रिपुरामंत्रज
पादौ रक्तचंदनविनादिदिभिर्वृत्तिप्रशस्ता ॥ तथाच
तंत्रराजे ॥ रक्तचंदनमाला च भोगदा मोक्षदा भवेत् ॥

न्यावैस्यैवतुलसीमालागजदंतेगणेश्वरे ॥ त्रिपु

राया जपेशक्त्या रुद्राक्षैरुक्तवदनैः ॥ मालानियम

स्तु रुद्रमालायां ॥ अन्याश्च होमसंपाणि नानिस्य

लक्षणानिवै कीटादिभिरदुष्टानि नजीर्णानिनवा

नि वै ॥ तथा गौतमीये ॥ पंचाशन्मातृभिर्माला

विलीता सर्वकर्मसु अकारादि क्षकारांतान

दमाला प्रकीर्तिता द्वाणिमेरुसूत्रं तत्र कल्पयेत्

तु निसत्तमः अनया सर्वविद्यानां जपःसर्वसम

द्धिदः ॥ चामुंडातंत्रे ॥ नित्यं जपं करेकुर्यात्रतुका

म्यमवेधनात् काम्यमपिकरेकुर्यात् मालाभावे

नसुंदरी ॥ तेन मालायाएव प्राधान्यकामनाभेदेऽ॥

॥ गौतमीये ॥

मा

१३

समासेनात्तत्त्वासनविधानमिह कथ्यते पंचविं
शतिभिर्मोक्षस्त्रिंशद्भिर्धनसिद्धये सर्वेष्वथा; स
प्तविंशात्पंचदश्यां भिचारके पंचाशद्भिः कार्य
सिद्धिः स्यात्त्वथा पंचकान्ते; षष्ट्या त्तरुप्राते; सर्वाः सि
द्धिरुक्ता मनीषिभिः ॥ अथासनभेद ॥ काम्यार्थे
केवलं चैव ब्रह्मचर्ये वरं त्वकेवलं कृष्णाजिने ज्ञानसि
द्धिर्मोक्षश्रीर्व्याघ्रचर्मणि कुशासने मंत्रसिद्धिर्ना
त्रकार्या विचारणा पाषाणे दुःखसंभूतिर्दौर्भाग्यंदा
रुजासने वंशासने दरिद्रः स्यात्पाषाणे व्याधिपीडनं
तृणासने यशोहानिः पल्लवे चित्तविभ्रमः; जपध्यानत
पोहानिं वस्त्रासनं करोति यः ॥ मंत्रवस्त्रासनं केवलं
ब्रह्ममेव निषिद्धं ॥

वस्त्रासनं रोगहरमित्यनेन वचनेन विधिहृत्कलजन
कत्वाभिधानात् चैलाजिनकुशोत्तरमित्यादिभगवद्व
चनात्तथा गौतमीये तथा च हृदासने मंत्रीपदाजि
नकुशोत्तरं मितिच ॥ अथ मालासंस्कारः तन्त्रकु
मारीये ॥ कार्पाससंभवं सूत्रं धर्मकामार्थमोक्षदं ॥
तच्चविप्रेन्द्रकन्याभिर्निर्मितंचेत्सुशोभनं पट्टसू
त्रं तथा रक्तं पट्टसूत्रं अथवापि वा शान्तिवश्याभिचा
रेषु मोक्षैश्वर्यजयेषु च शुक्लं रक्तं तथा पीतं कृष्ण
वर्णं शुभं क्रमात् सर्वेषामेव वर्णानां रक्तं सर्वेप्सि
तप्रदं त्रिगुणं त्रिगुणीकृत्य ग्रन्थयेद्वशाल्पशास्त्र
तः एकैकमात्रकावर्णमेहं च ग्रन्थिसंयुतं ग्रथ
यित्वाक्षमालां ततः संस्कारमाचरेत् ॥ गौतमीये ॥

मा
१८

स्वे विष्णु लं ब्रह्म संयोज्य पञ्चके पूर्वं तु योजयेत् गोमुत्र सद्

द्गोमालोय चतुः सर्पाकृतीर्भवेत् एवं निर्माय मालां वि

शोधयेन्मनुभिस्ततैः अमृतस्य पञ्चैव कैः पद्माकार

तु कल्पयेत् तन्मध्ये स्थापयेन्मालां मूलमन्त्रमुच्चरन् ।

क्षालयेत् पञ्चगव्येन सद्योजातेन मन्त्रजैः ॥ सद्योजा

तमन्त्रस्य ॥ ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः

भवे भवे नातिभवे भजस्व मां भवोद्भवं चन्दनाद्युत्तमगन्धा

द्यैर्वामदेवेन घर्षयेत् ॥ वाममन्त्रस्य ॥ ॐ वामदेवाय नमो

ज्येष्ठाय रुद्राय नमः कालाय कलविकरणाय नमो बलप्र

मथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः धूप

यित्वा अघोरमन्त्रेण अघोरमन्त्रस्य ॥ ॐ अघोरेभ्यो: घो

अघोरेभ्यो अथघोरेभ्यो: अघोरघोरतरेभ्यो: सर्वत:

सर्वसर्वेभ्यो नमोस्तु रुद्ररूपेभ्यः तत्पुरुषस्य नन्तु तत्पुरुषमवस्तु ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् मन्त्रयेत्पञ्चमेनैव प्रत्येकं तु शतं शतं मेहरुद्रमंत्रयेत्तत्रैव मन्त्रं नाचमनं शतं प्रथम मंत्रस्तु ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपति ब्रह्मणोऽधिपतिः शिवो मेऽस्तु स[illegible] शिवो प्रत्येकं तु सकलं सकृदिति वा ॥ तथाचमनमेव [illegible] पद्धा ॥ प्रत्येकं

मन्त्रयेन्मन्त्री पञ्चमेन सकलं सकृदिति ॥ तथा च गी

तमीये ॥ सम [illegible] दायमालामधिकृत्य पञ्चमेनैव सं

मा केन शतानां [illegible] न्युने न मंत्रये [illegible] इति दर्शनान्मा

१५ यां वा शतजपः तत्रावाहयजे देवं तथा वि

भवविस्तरैः मालायां प्राणप्रतिष्ठां न तां देवतां प्रजयेत्

तथाच सनत्कुमारसंहितायां ॥ सत्कृत्यैवं ब्रुधो मालां
तत्र आसनं स्थापयेत् मूलमंत्रेण तां मालां पूजयेद्द्विज
सत्तम: वाराहीतंत्रे ॐमाले माले महामाले सर्वसिद्धि
स्वरूपिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भ
व मायाबीजादिकं कृत्वा रक्तपुष्पैः समर्चयेत् ॥ इति
शक्तिविषयं ॥ मंत्रयेत्पूर्वमंत्रेण क्रमेणानेन योगनः
तथैव मातृकावर्णैः मंत्रयेत्तां तत प्रवेत् ॥ योगिनीतंत्रे ॥
ॐ होमकर्म ततः कुर्यात् देवताभावसिद्धये ग्रहोत्तरश
तं कृत्वा सपात्राज्यं विनिक्षिपेत् होमकर्मण्यशक्तो
द्विगुणं जपमाचरे नान्यमंत्रं जपेमन्त्रीकपये न विधून
येत् कंपनात्सिद्धिहानिः स्यात् धूननं बहुदुःखदं शब्दे
जाते भवेद्रोगः करभ्रष्टा विनाशकृत् छिन्ने सूत्रे भ
वेन्मृत्युस्तस्माद्यत्नतरो भवेत् त्वं माले सर्वदेवानां

सर्वसिद्धिप्रदा मता तेन मन्त्रेण मे सिद्धिं देहि मातर्नमोस्तु ते
इत्युक्त्वा परिपृज्याथ गोपयेद्यत्नतो गृही। कामनाभेदेन तं गु
लिनियम:॥ नथाथ ॥ तर्जन्यंगुष्ठयोगेन शत्रूच्चाटनका
रकं अंगुष्ठमध्यमायोगान्मंत्रसिद्धि: ह्यनिष्ठिना अंगुष्ठा
नामिकायोगादुच्चाटयेत्स्याद्नेमते ज्येष्ठाकनिष्ठयोगेन
धनूणां नाशनं मतं जीर्णसूत्रेण पुन: सूत्रे ग्रथयित्वा श
तं जपेत् प्रमादात्पतिते रुद्रात्नात मे छोत्तरं जपेत्
मा. जपेन्निषिद्धसंस्पर्शे क्षालयित्वा यथोचित:। छिन्नप्प
१८ छोत्तरं जप: छिन्नकरश्रेष्ठयोस्तु स्यात्॥ इति तंत्र
सारे मंत्रशोधनमालाशोधनविधि॥ ॥ ॥

16